

# श्री राधा अष्टोत्तरशतनामस्तोत्रम्


**पंडित सुनील वत्स**

https://astrodisha.com

**Whatsapp No: 7838813444**

**Facebook: https://www.facebook.com/AstroDishaPtSunilVats**

**YouTube Channel : https://www.youtube.com/c/astrodisha**

# Sri Radha Ashtottara Shatanama Stotram

# श्री राधा अष्टोत्तरशतनामस्तोत्रम्

**॥ध्यान॥**

हेमाभां द्विभुजां वराभयकरां नीलाम्बरेणावृतां
श्यामक्रोडविलासिनीं भगवतीं सिन्दूरपुञ्जोज्ज्वलाम्।
लोलाक्षीं नवयौवनां स्मितमुखीं बिम्बाधरां राधिकां
नित्यानन्दमयीं विलासनिलयां दिव्याङ्गभूषां भजे॥

**॥स्तोत्र॥**

अथास्याः सम्प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम्।
यस्य सङ्कीर्तनादेव श्रीकृष्णं वशयेद् ध्रुवम्॥१॥

राधिका सुन्दरी गोपी कृष्णसङ्गमकारिणी।
चञ्चलाक्षी कुरङ्गाक्षी गान्धर्वी वृषभानुजा॥२॥

वीणापाणिः स्मितमुखी रक्ताशोकलतालया।
गोवर्धनचरी गोपी गोपीवेषमनोहरा॥३॥

चन्द्रावलीसपत्नी च दर्पणास्या कलावती।
कृपावती सुप्रतीका तरुणी हृदयङ्गमा॥४॥

कृष्णप्रिया कृष्णसखी विपरीतरतिप्रिया।

प्रवीणा सुरतप्रीता चन्द्रास्या चारुविग्रहा॥५॥

केकराक्षी हरेः कान्ता महालक्ष्मी सुकेलिनी।
सङ्केतवटसंस्थाना कमनीया च कामिनी॥६॥

वृषभानुसुता राधा किशोरी ललिता लता।
विद्युद्वल्ली काञ्चनाभा कुमारी मुग्धवेशिनी॥७॥

केशिनी केशवसखी नवनीतैकविक्रया।
षोडशाब्दा कलापूर्णा जारिणी जारसङ्गिनी॥८॥

हर्षिणी वर्षिणी वीरा धीरा धारा धरा धृतिः।
यौवनस्था वनस्था च मधुरा मधुराकृतिः॥९॥

वृषभानुपुरावासा मानलीलाविशारदा।
दानलीला दानदात्री दण्डहस्ता भ्रुवोन्नता॥१०॥

सुस्तनी मधुरास्या च बिम्बोष्ठी पञ्चमस्वरा।
सङ्गीतकुशला सेव्या कृष्णवश्यत्वकारिणी॥११॥

तारिणी हारिणी ह्रीला शीला लीला ललामिका।
गोपाली दधिविक्रेत्री प्रौढा मुग्धा च मध्यका॥१२॥

स्वाधीनपतिका चोक्ता खण्डिता याभिसारिका।
रसिका रसिना रस्या रसशास्त्रैकशेवधिः॥१३॥

पालिका लालिका लज्जा लालसा ललनामणिः।
बहुरूपा सुरूपा च सुप्रसन्ना महामतिः॥१४॥

मरालगमना मत्ता मन्त्रिणी मन्त्रनायिका।
मन्त्रराजैकसंसेव्या मन्त्रराजैकसिद्धिदा॥१५॥

अष्टादशाक्षरफला अष्टाक्षरनिषेविता।
इत्येतद्राधिकादेव्या नाम्नामष्टोत्तरं शतम्॥१६॥

कीर्तयेत्प्रातरुत्थाय कृष्णवश्यत्वसिद्धये।
एकैकनामोच्चारेण वशीभवति केशवः॥१७॥

**॥ इत्यूर्ध्वाम्नाये श्रीराधाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥**

## श्री राधा अष्टोत्तरशतनामावली

**https://astrodisha.com/sri-radha-ashtottara-shatanamavali-108-naam/**

**पंडित सुनील वत्स**

Website : https://astrodisha.com

Whatsapp No : +91- 7838813444

Contact No: +91-7838813 - 444 / 555 / 666 / 777

Facebook : https://www.facebook.com/AstroDishaPtSunilVats

YouTube Channel : https://www.youtube.com/c/astrodisha